अधिकरणतायाः अवच्छेदकत्वं भवति किम् ?

प्रश्नः— अवच्छेकधर्मः च अवच्छेदकसम्बन्धः च भवतः इति अस्माभिः अधीतम् | दृष्टान्ते घटः समवायसम्बन्धेन भूतले नास्ति; तत्र घटाभावस्य प्रतियोगितायाः अवच्छेदकसम्बन्धः समवायसम्बन्धः, अवच्छेदकधर्मश्च घटत्वम् |

अग्रे घटः संयोगसम्बन्धेन भूतले अस्ति अपि च घटः संयोगसम्बन्धेन पुस्तके अस्ति | अत्र भेदः केवलम् अधिकरणस्य | घटे विद्यमाना आधेयता अधिकरणतया भिद्यते किम् ?

उत्तरम्— आं भिद्यते |

प्रश्नः— नाम अधिकरणतायाः अपि अवच्छेदकत्वम् |

उत्तरम्— नैव | अधिकरणतायाः निरूपकत्वम् |

प्रश्नः— यत्र घटः संयोगसम्बन्धेन भूतले अस्ति अपि च घटः संयोगसम्बन्धेन पुस्तके अस्ति, उभयत्र घटे विद्यमाना आधेयता भिन्ना किल ? आधेयता भिद्यते अधिकरणता-भेदेन |

उत्तरम्— तत्र किम् उच्यते, घटत्वावच्छिन्ना संयोगसम्बन्धावच्छिन्ना आधेयता, सा च आधेयता एकस्मिन् स्थले भूतलनिष्ठ-अधिकरणता-निरूपिता आधेयता; अपरस्मिन् स्थले पुस्तकनिष्ठ-अधिकरणता-निरूपिता आधेयता | एकस्मिन् निरूपकम् अस्ति भूतलम्, अन्यस्मिन् निरूपकम् अस्ति पुस्तकम् |

किन्तु धेयं यत् अत्र अधिकरणतायाः अवच्छेदकत्वं नास्ति अपि तु निरूपकत्वम् | आधेयता-अधिकरणतयोः निरूप्यनिरूपकभावः भवति न तु अवच्छेद्य-अवच्छेदकभावः | आधेयता-अधिकरणता, विषयता-विषयिता, प्रतियोगिता-अनुयोगिता, एषां परस्परं निरूप्यनिरूपकभावः | आधेयता-निरूपिता-अधिकरणता; अधिकरणता-निरूपिता-आधेयता | एवमेव अन्यत्र, निरूप्यनिरूपकभावः; एषु परस्परम् अवच्छेद्य-अवच्छेदकभावः नास्ति |

तर्हि निष्कर्षः एवं यत् आधेयता-अधिकरणतयोः निरूप्यनिरूपकभावः; अनेन आधेयता भिद्यते अधिकरणता-भेदेन |

अग्रे गत्वा कुत्र अवच्छेदकत्वस्य प्रसङ्गे विस्तरेण वक्ष्यते | अत्र एतावत् बोध्यं यत् अधिकरणता-भेदेन आधेयता भिद्यते | अपि च तत्र निरूप्यनिरूपकभावः अस्ति |

Swarup – December 2015